॥ श्रीः ॥

श्रीलघुभट्टारकप्रणीता

# लघुस्तुतिः

श्रीराघवानन्दप्रणीतया वृत्त्या समेता ।

---

विश्वातीतचिदेकविग्रहवती विश्वात्मिकापीह या
भाति ध्वस्तभिदाभ्रमैः सुकृतिभिर्या शश्वदासेव्यते ।
विश्वासेन हृदाहमित्यवतु सा संसारदुःखार्दिता-
नन्यत्राशरणान् गृहीतचरणानस्मान्महेशप्रिया ॥

श्रीमल्लघुभट्टारकः[1] स्वयं निर्व्याजसमाराधितगुरुवरकरुणाकटाक्षैर्लब्धपरशक्तिपातापरनामधेयपरसंविदात्मैक्यबोधसिद्धपरसंविदात्मभावैः, प्रक्षीणाशेषदोषपाशपटलः[2] प्रादुर्भूतपरमनिर्वृतिः परेषामप्यनया परदेवतातत्त्वविभूतिविभवविशेषप्रकाशिन्या स्तुत्या परसंविद्भावो भूयादिति तदज्ञानाज्जन्मादिमरणान्तदुःखसागरे निमग्नाञ्जनानात्मदृष्टान्तेनावलोक्यानुकम्पाकुलहृदयस्तेषामाशिषमाशासानः स्तुतिं प्रस्तौति —

**ऐन्द्रस्येव शरासनस्य दधती मध्येललाटं प्रभां**
**शौक्लीं कान्तिमनुष्णगोरिव शिरस्यातन्वती सर्वतः ।**
**एषासौ त्रिपुरा हृदि द्युतिरिवोष्णांशोः सदाहस्थिता**
**छिन्द्याद् वः सहसा पदैस्त्रिभिरघं ज्योतिर्मयी वाङ्मयी ॥**

---

१. 'लभट्टाचार्यः स्व' ख. पाठः. २. 'क्षताशेषमल' क. ख. पाठः. ३. 'यः', ४. 'म्यः' क. पाठः.

DR. RUPNATHJI( DR. RUPAK NATH )

ऐन्द्रस्येवेति।

"आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्"

इति प्रथमपठित आशीर्वाद इहादावौचित्यसरणिमनुसरति। वस्तुनिर्देशस्तच्छेषतयैव क्रियते। तेन चास्य स्तोत्ररत्नस्य मन्त्रदेवतारूपो विषयश्च प्रकाश्यते[1]। आशीर्वादेन प्रयोजनं च सद्योमुक्तिलक्षणं प्रकाश्यते[2]। इह[3] मायापाशबद्धास्तापत्रयतप्ततनवः सर्वे पशवः। तेष्वपि विधिमधिकृत्य स्वेच्छामात्रेण वा ये पशून् घ्नन्ति मनुष्यास्ते सर्वेऽप्यत्र गुरुदेवताभक्तिभाजोऽधिकारिण इत्यविशेषनिर्देशाद् गम्यते। यथोक्तं —

"सर्वोपायपरिभ्रष्टः कुलमार्गमुपाश्रयेद्"

इति। सर्वाधिकारित्वेन[4] चास्य स्तोत्रतन्त्रस्य[5]ात्यन्तशुद्धत्वं भूरिफलत्वं च भागीरथीभारत्यादिप्रवाहादिवदाविष्कृतं भवति। वः युष्माकम् अघं छिन्द्याद् इत्युक्तिभङ्ग्या स्वयं परिसमाप्तसकलकामत्वात् परानुग्रहैकप्रयोजन[6] एवेति स्वात्मेश्वर[7]भावस्याविष्कृतः, येनास्य स्तोत्रतन्त्रस्य सर्वैः स्वतःप्रमाणत्वेन ग्रहणं स्यात्। नोखल्वविमुक्तपाशपटलस्यानाविर्भूतभगवद्भावस्यानाप्तकामस्य वसिष्ठकुलोद्भवस्य चत्वारिंशत्संस्कारसंस्कृतस्य द्विजवरस्यापि वाक्प्रवाहवैतरणीं कृतपुण्यः कोऽपि नरो बुद्धिपूर्वमवतरति, यस्तु नात्महन्ता भवति। एतच्च पूर्वसूरिभिः सङ्ग्रहविस्ताराभ्यां भूरिशो विवृतमपि स्वशुद्धिपद्धतिमध्यासीनेन राघवानन्दनाम्ना मुनिमुख्येन प्राचीनलोकनिषेवितमपि भागीरथीभारत्याद्यम्भ इदानीन्तनैर्यथा स्वशुद्धये निषेव्यते, तथा सङ्ग्रहविस्ताराभ्यां यथाशक्ति विमृश्यते। इह द्विविधं वृत्तं मात्रावृत्तं वर्णवृत्तं चेति। तत्र [8]चतसृभिश्चतसृभिर्मात्राभिः पञ्च गणा यत्र कल्प्यन्ते, तैश्च श्लोका ग्रथ्यन्ते, तन्मात्रावृत्तं, यथा पथ्यार्यादि[10]। यत्र पुनस्त्रिभिस्त्रिभिर्वर्णैर्गणाष्टकं कल्पयित्वा तदवलम्बनेन[9] ग्रन्थविरचनं तद् वर्ण-

१. 'त एव। आ', २. 'त एव। इ' ग. पाठः ३. 'तीशमा' क. ख. पाठः. ४. 'नास्य' ग. पाठः. ५. 'स्य चात्य' क. पाठः. ६ 'नजीवन ए' क. ख. पाठः. ७. 'त्मैश्वर्यभा' ग. पाठः. ८. 'तिसृ' क. पाठः. ९. 'म्बेन', १०. 'विस्तरर' ग. पाठः.

DR.RUPNATHJI(DR.RUPAK NATH)

वृत्तम् । तस्मिंश्चैकैकाक्षरादिक्रमप्रमितपादचतुष्काणामुक्तात्युक्तादिच्छन्दसामेकैकार्णाधिकाङ्घ्रीणामुत्कृत्यन्तानां षड्विंशत्यर्णमितपादान्तानामवतारः । ततः परं चण्डवृष्टिप्रपातादिदण्डका भवन्ति । तेष्वेकोनविंशत्यर्णमितपादेऽतिधृतिसंज्ञे छन्दसि शार्दूलविक्रीडिताख्यवृत्तवानयं श्लोकनिचयः स्तुतिरूपो भवति । अत्रायमादिश्लोकस्त्रिपुरामन्त्रतद्देवतास्वरूपोपक्षेपकः । ततो द्वौ तत्प्रथमबीजदेवतालक्षणस्य तत्त्वस्य नादविन्दुप्राधान्येन बीजप्राधान्येन च सेवाफलप्रकाशकौ । चतुर्थस्तद्द्वितीयबीजदेवतासेवाफलार्थः । पञ्चमस्तृतीयबीजदेवतासेवाफलानुगः । षष्ठस्तन्मन्त्रजपक्रमफलाख्यापकः । सप्तमस्तन्मन्त्रबीजत्रयसाधारणदेवताध्यानफलोद्दीपकः । ततस्त्रयः श्लोका एकैकबीजदेवताध्यानफलविषयाः । एकादशो द्वितीयबीजस्थनिष्कलाक्षरध्यानफलप्रतिपादकः । द्वादश एतत्सेवनस्य सार्वज्ञ्यसाम्राज्यादिदृष्टफलत्वं गमयति । त्रयोदश एतत्सेवनेन विनान्यैरपि साधनान्तरैर्भोगमोक्षयोरिहैवानुभूतिर्दुर्लभा भविनामिति भाषते । चतुर्दश एतत्सेवाधिकारिसाधनफलविशेषप्रत्यायकः । पञ्चदशो देव्याः प्रपञ्चातीतरूपोपदेष्टा । षोडशः शब्दार्थात्मकप्रपञ्चमयरूपनिर्णयकर्णधारः । सप्तदशः कार्यविशेषकामुकैर्ध्येयं परमेश्वर्या विभूतिविशेषं तन्नाम चोपदिशति । अष्टादशस्तन्मन्त्रपारायणविषयः । एकोनविंशस्तन्नामपारायणविषयः । विंशः स्तोत्रस्यास्य त्रिपुरासंविद्विषयत्वेन स्वयं मन्त्रमयत्वेन च सद्भिरभ्यसनीयत्वख्यापकः । एकविंशो गुरुदेवताप्रसादबलेनैवाल्पश्रुतादप्यस्मत्तो बुद्धिपूर्वं झगिति निर्बाधमाविर्भूतत्वादेतदागमवत्[2] स्वतःप्रमाणत्वेन ग्राह्यं महात्मभिरि(ती)ममर्थं समर्थयते । एष स्तोत्रार्थसारसर्वस्वसंक्षेपः । अथ क्रमेणैकैकश्लोकार्थोऽपि तत्रोदीर्यते । एषा प्रमातृप्रमाणप्रमेयात्मकद्वैतप्रपञ्चरूपेणाखिलजनैरनुभूयमाना, न पुनर्देशकालादिव्यवहिता । असौ एतदाविर्भावतिरोभावस्थानत्वात्[3] प्रमात्रादिप्रभेदविहीना अखण्डसंविदात्मकप्रपञ्चोत्तीर्णरूपा च । अत एव स्वभक्तिशून्यैः कैश्चिदप्यदृष्टतत्त्वा । त्रिभिः पदैः पुरैरुपलक्षिता ।

---

१. 'त्र त्रयः' ख. पा०. २. 'र्थसं' क. ग. पाठः. ३. भाषाव', ४. 'दर' ख. ग. पाठः.

DR.RUPNATHJI( DR.RUPAK NATH )

अत एव त्रीणि पुराण्यस्या इति त्रिपुरेति प्रसिद्धा देवी वः स्वोपासकानां युष्माकम् । अघम् आत्मतत्त्वाज्ञानमात्रपरमार्थम् आणवमायीयकार्मभेदेन त्रिविधं मलम् । सहसा अचिरेण कालेन । सदा पुनरुत्थानशून्यतया । छिन्द्यात् स्वेनात्मना प्रत्यक्षीभूय संहरेदित्यन्वयः । तथाचागमः —

"स्वरूपज्योतिरेवान्तः परा वागनपायिनी ।
यस्यां दृष्टस्वरूपायामधिकारो निवर्तते ॥"

इति । अन्तर्दृष्टस्वरूपायामिति योज्यम् । भगवद्गीता च —

"अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ।
ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ॥
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ।
तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः ॥
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥"

इति । किं तस्याः स्वरूपमित्यत उक्तं ज्योतिर्मयी वाङ्मयीति । प्रकाशैकवपुषः सर्वभूतात्मनः परमेश्वरस्य स्वभावभूतो योऽनवच्छिन्नोऽहंविमर्शः, स ज्योतिःपदेन निगद्यते । यथोक्तं रहस्यागमे—'स्वसंवित् त्रिपुरा देवी'ति । तद्विमर्शाभिलापलक्षणोऽकारादिहकारान्ताशेषवर्णप्रत्याहाररूपोऽखिलाम्नायसारभूतः

"अक्षराणामकारोऽस्मि द्वन्द्वः सामासिकस्य च"

इति श्रीभगवद्गीतोक्तनीत्या 'प्रकृतिरथ हसंज्ञा भवेद् व्याप्य विश्वमि'त्याचार्योक्तनीत्या च द्वन्द्वसमासत्वं नपुंसकत्वमेकत्वं च प्राप्ताकारहकारविग्रहोऽहंशब्दोऽनपायी परेति महामन्त्र इति च प्रसिद्धो वाक्शब्देन गृह्यते, 'तदात्मानमेवावेदहं ब्रह्मास्मी'ति श्रुतेः,

"पूर्णाहन्तात्मभावेन कृत्रिमाहन्तया विना ।
आत्मानमात्मना साक्षाद् यः पश्यति स पश्यति ॥"

इति च श्रीमदनुत्तरनिर्णयात् । एवञ्च एषासौ ज्योतिर्मयी वाङ्मयी चेत्यंशेन

DR. RUPAKNATH (DR. RUPAKNATH)

"विश्वात्मिकां तदुत्तीर्णां हृदयं परमेशितुः ।
पराद्दिशक्तिरूपेण स्फुरन्तीं संविदं नुमः ॥"

इति रहस्याम्नायार्थः प्रकाशितः । एषासावितीहोपात्ते देव्याः परा-परारूपे नागमेष्वेव प्रसिद्धे, किन्तूपनिषत्स्वपि—

"विश्वतः परमं नित्यं विश्वं नारायणं हरिम्"

इति, भगवद्गीतायां च सप्तमेऽध्याये—

"भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥
अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो! ययेदं धार्यते जगत् ॥"

इत्यादि, त्रयोदशाध्याये च—

"इदं शरीरं कौन्तेय ! क्षेत्रमित्यभिधीयते ।
एतद् यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥"

इत्याद्युपदिष्टे, आचार्यैश्च प्रपञ्चसारे—'प्रकृतिः पुरुषश्चैव नित्यावि'त्यादिनानुगृहीते । केन क्रमेण पुनर्द्वैव्यघच्छेदनाभिमुखी भवेदित्यपेक्षायां तदुपायोपासनास्थानविषयसाधनान्याविष्कर्तुं ज्योतिर्मयं वाङ्मयं च देव्याः पद्त्रयमाह—ऐन्द्रस्येत्यादिना । मध्येललाटं ललाटस्य मध्ये, आज्ञास्थाने । ऐन्द्रस्य शरासनस्येव प्रभां दधती । हृदयपद्मस्था भ्रूमध्यब्रह्मपर्यन्तदीप्तशुक्लरक्तकृष्णतेजोमात्रमूर्तिस्त्र्यवयवेन कामबीजेनोपास्येति यावत् । शिरसि द्वादशान्तपद्मे अनुष्णगोश्चन्द्रस्येव शौक्लीं कान्तिं सवेत आतन्वती । आज्ञापद्मस्था तावद्व्याप्तशशिप्रभासदृशप्रभारूपा शक्तिबीजेनोपास्येति यावत् । हृदि हृदयपुण्डरीके । अहःस्थिता उदिता उष्णांशोः रवेः द्युतिः प्रभेव स्थिता मूलाधारपद्मस्था हृत्पद्मपर्यन्तप्रभा चोद्यदर्कसदृशज्योतीरूपा वाग्भवेनोपास्येति यावत् । यथोक्तं श्रीसौभाग्यहृदये—

"योनौ कनकपुञ्जाभं हृदि विद्युच्छटोज्ज्वलम् ।
आज्ञायां चन्द्रसङ्काशं महस्तव महेश्वरि ! ॥"

१. 'च भूतिस' ख. पाठः.

DR. RUPNATHJI( DR. RUPAK NATH )

इति । सोऽयं स्तुतिप्रकारः । मन्त्रोद्धारप्रकारस्तु — "यत्राद्यवृत्ते स्फुटम् । एवं द्वित्रिपदक्रमेण कथितस्तत्पादसंख्याक्षरैर्मन्त्रोद्धारविधि-रि"त्यन्ते वक्ष्यमाणत्वाद् अस्मिन् श्लोके आद्यद्वितीयतृतीयपादेषु क्रमेण आद्यद्वितीयतृतीयार्णतया श्रीबालाबीजान्युद्धृतानि । सर्वत इत्यत्र विसर्गश्च सौकारात् प्रागेव सकारस्य तदुत्थत्वादुद्धृतः । सर्वत इति तपरकरणेनानुत्तरमप्युद्धृतम् । तयोः पृथक्करणेन शुद्धादिभेदश्च सूचितः । "विशेषसहितो मन्त्रोद्धारविधिः कथित" इत्युक्तत्वाद् इहैव तद्विशेषाश्चोद्धृताः । कथम् । ऐ, ई, औ । ऐं, ई, औ । ऐं, ईं, औ । ऐं, ईं, औः । इति शुद्धाभेदास्तावदत्रैवान्तर्भवन्तीति सहोद्धृताः । एवं सदा अहास्थिता अकारहकारयोः स्थिता । शिरस्यनुष्णगोर्बिन्दोर्हेतोः सर्वतः कान्तिं महाप्रकाशविमर्शसमुल्लेखशक्तिशोभां दधतीति च सर्वमन्त्रबीज-भूतो महामन्त्र उद्धृतः । ह्रैं क्लीं ह्सौः सर्वतः सर्वेषु बीजेषु हस्थिता हकारे स्थिता इति त्रिपुरावासिनीमन्त्र उद्धृतः । ह्रैं, ह्रीं, ह्सौः सर्वतः सहसा हकारसकाराभ्यां सह वर्तमानेति मध्यमचतुष्कूटत्रिपुराश्रीम-न्त्रः । ह्सैं, ह्स्क्लीं, ह्सौः । सहसा सदाहस्थिता सदाहो दाहगुणवान् वह्निस्तस्मिन् रेफे स्थितेति मध्यमपञ्चकूटत्रिपुरादेवीमन्त्रः । ह्स्रैं, ह्स्-क्लरीं, ह्स्रौः । सर्वतः सहसा सदाहस्थिता क्लीं कान्तिं ककारलकार-रूपिणीं कान्तिं शोभाहेतुमातन्वती चेति सर्वपञ्चकूटत्रिपुरासिद्धामन्त्रः । ह्स्क्रैं, ह्स्क्रीं, ह्स्क्रैः । तत्रैवानुष्णगोष्ठकारस्य शिरसि ऊर्ध्व-स्थितडकारे निमित्ते च सर्वतः कान्तिं प्रभामातन्वतीति श्रीमद्द्वाद-शार्धकूटात्मा त्रिपुराम्बिकामन्त्रः । ह्स्क्डैं, ह्स्क्डीं, ह्स्क्डौः । एते चत्वारः सादयश्च भवन्ति । स्हैं, स्ह्क्लीं, स्हौः । इत्यादि । तथा बालादयः षण्मन्त्रा विसर्गान्ता बिन्द्वन्ता बिन्दुविसर्गान्ता उभयवि-कलाश्च स्युः । इत्यादियथाश्रुतमूह्यम् । बालाप्रथमबीजान्त्यबीजाभ्यां बिन्दुविसर्गान्ताभ्यां सर्वे स्वरा आविष्कृताः । कथम् । इवर्णावर्णयोर्गु-णयोगादेकारो भवति । पुनरेकारस्य अवर्णेन वृद्धियोगादैकारः । तथाच

---

१ 'रि', २. 'तः । स' क पाठः. ३ 'सहसाश्री' ख. ग. पाठः. ४. 'ह्रैं क्लीं ह्सौः । स' ख. पाठः.

DR.RUPNATHJI(DR.RUPAK NATH)

मन्त्रसामान्यस्य फलत्वेनोपदिष्टः, तथापीह तद्विशेषस्य फलचिन्तार्थमयमारम्भ इति सनादाबिन्दूपासनस्य मोक्ष एव फलमित्युपदिश्यते। देवीति संबोधनमुत्तरश्लोकादिहापि ग्राह्यम् । विश्वसर्गस्थापनसंहरणतिरोभावानुग्रहलक्षणैः पञ्चकृत्यैः स्वात्मन्येव विहरतीति वा स्वप्रकाशसंविद्रूपेति वा देवी, तस्याः संबोधनं तथा । यद्वा देवस्य स्वप्रकाशैकतनोर्महादेवस्य सर्वान्तरात्मनः स्वभावभूतानवच्छिन्नाहंविमर्शमयी देवी । शून्यबुद्धिप्राणदेहलक्षणमायाप्रमातृतदन्तर्गतसुखदुःखनीलपीताद्यर्थतज्ज्ञानानां स्वाभासावेशवशेनाहम्ममेत्यादिरूपेण प्रकाशयित्री वा देवी । तव संबन्धिनि त्वद्विषये प्रथमे वाग्बीजे वाग्भवाख्ये बीजे मूलाधारचतुर्दले पद्मकर्णिकागतत्रयोनिमध्ययोन्यात्मनि त्रिकोणाकारे । स्थिता तन्मध्यस्था सनादाबिन्दुरूपा । या मात्रा कला। त्रपुसीलतातनुलसत्तन्तूत्थितिस्पर्धिनी। त्रपुसीलता उर्वारुवल्ली, तस्यास्तनोर्लसन्ती या तन्तूत्थितिस्तन्तोरूर्ध्वयः उत्थितो वृत्ताग्रसूक्ष्मो गुणः, तया स्पर्धिनी सदृशी समानसंस्थानज्योतीरूपा कुण्डलिनी शक्तिरिति शास्त्रेषु प्रसिद्धा । तां विश्वजननव्यापारबद्धोद्यमां परापश्यन्त्यादिरूपिणीं पञ्चाशद्वर्णक्रमेण शब्दार्थप्रपञ्चजनयित्रीम् । सदा सवनत्रयेऽपि । ज्ञात्वा स्वात्मतयोपास्य । नरा जननीगर्भे स्थितं यदर्भकत्वं, तन्न पुनः स्पृशन्ति न प्राप्नुवन्ति, स्वयं विश्वजनकजननीभावं गतत्वात् । इत्थं मन्महे निश्चिनुमः । ते भवद्भक्ता वयम् ॥ २ ॥

एवं सनादाबिन्दूपासनस्य मोक्षफलत्वमुक्त्वा बीजोपासनस्य तत्साधनज्ञानसाधकतमवाक्सिद्धिरूपं फलं कैमुतिकन्यायेन कथयति—

**दृष्ट्वा सम्भ्रमकारि वस्तु सहसा ऐ ऐ इति व्याहृतं**
**येनाकूतवशादपीह वरदे! बिन्दुं विनाप्यक्षरम् ।**

१. 'प', २. 'स्वप्रभा', ३. 'सीना न' ख. पाठः. ४. 'कत्वत' ग, 'कम' छ. पाठः.

DR.RUPAKNATH)

**तस्यापि ध्रुवमेव देवि! तरसा जाते तवानुग्रहे**
**वाचः सूक्तिसुधारसद्रवमुचो निर्यान्ति वक्त्रोदरात् ॥**

दृष्ट्वा संभ्रमेति । वरं साधकाभिमतार्थसर्वस्वं ददातीति वरदा, तत्र संबोधनं वरदे! इति । इह लोके । येन पुंसा सहसा अकस्मात् । संभ्रमकारि सर्पादिकं वस्तु दृष्ट्वा । आकूतवशाद् अभिप्रायान्तरवशाद् भयादिहेतोरपि । ऐ ऐ इति बिन्दुं विनाप्यक्षरम् आद्यं व्याहृतं, तस्यापि तवानुग्रहे जाते

"अनिच्छयापि संस्पृष्टो दहत्येव हि पावकः"

इति न्यायात् त्वत्कटाक्षपाते जाते सति । तरसा झटिति । सूक्तिसुधारसद्रवमुचः सूक्तयः सलक्षणाः सुमधुरा उक्तयः, ता एव सुधारसद्रवः, तं मुञ्चन्तीति तथा । एवंभूता एव वाचो वक्त्रोदरान्निर्यान्ति स्वयमेव प्रादुर्भवन्ति । ध्रुवं निश्चितमेतत् । तदेककामनया यथाविधि कृत्स्नं बीजमभ्यस्यतः किं पुनरित्यर्थः ॥ ३ ॥

एवं द्वितीयबीजेऽप्येकदेशस्यापि सारस्वतत्वं, किं पुनः समस्तस्येत्याशयेनाह —

**यन्नित्ये! तव कामराजमपरं मन्त्राक्षरं निष्कलं**
**तत् सारस्वतमित्यवैति विरलः कश्चिद् बुधश्चेद् भुवि ।**
**आख्यानं प्रतिपर्व सत्यतपसो यत् कीर्तयन्तो द्विजाः**
**प्रारम्भे प्रणवास्पदप्रणयिनीं नीत्वोच्चरन्ति स्फुटम् ॥**

यन्नित्ये इति । हे नित्ये! कालत्रयानवच्छिन्नचिद्रूपे! यत् कामराजं कामराजसंज्ञम् । अपरं द्वितीयमन्त्राक्षरम् । निष्कलं ककारलकाराभ्यां रहितमपि । सारस्वतं सरस्वतीप्रसादकरमिति चेद् भुवि कश्चिदवैति, स विरलोऽल्पः बालकोऽपि बुधो भवति । कुतः, प्रतिपर्व प्रत्यमावासि । सत्यतपसः ऋषेः । आख्यानं कीर्तयन्तो द्विजाः यद्

---

१. 'सर्वा', 　 २. 'त्यर्थः' ग. पाठः.

DR.RUPAK NATH(DR.RUPNATHJI)

अक्षरम् । प्रणवास्पदप्रणयिनि प्रणव एव यदास्पदमधिष्ठानं तस्मिन् प्रणयिनि सापेक्षे प्रारम्भे । ई नीत्वा ई इत्येतावन्मात्राकारं कृत्वा स्फुटमुच्चैरुच्चरन्ति । प्रणवेन सहैकार्थत्वादेकप्रयोजनत्वाच्चास्य त्रिपुरसरस्वतीतत्त्वबोधफलत्वं निश्चीयत इत्यभिहितं भवति । तथाच श्रुतिः— 'यस्तित्याज सचिविदं सखायं, न तस्य वाच्यपि भागो अस्ति । यदीं शृणोत्यलकं शृणोति, नहि प्रवेद सुकृतस्य पन्थाम्" इति । अयमर्थः— वाचि मन्त्रबीजविशेषेऽपि । सचिविदं समवेतं नित्यसम्बन्धनम् । सखायं समानं ख्याति अर्थविशेषं प्रकथयति सखा, तम् ऐक्येन प्रतिपत्तमेकार्थनिष्ठं च वर्णम् । यस्तित्याज त्यजति । तस्य भागः तज्जप्तॄणां यत् फलं तद् नास्ति नैव भवति । तदेवोदाहृत्य दर्शयति— यदीमिति । ई इत्येतद्वर्णरूपं यः शृणोति आचार्यसकाशाद् गृह्णाति, स यद् यदि । अलकं ककारलकाराभ्यां रहितम् । शृणोति ई इत्येव मन्त्रत्वेन गृह्णाति । तर्हि सुकृतस्य कामबीजजपसम्भूतस्य पुण्यस्य पन्थां पन्थानं मार्गं फलं त्रैलोक्यवशीकरणलक्षणम् । नहि प्रवेद नानुभवति । किन्तु सर्वद्वैतप्रपञ्चदर्शनलक्षणबन्धविमुक्त एव भवेत् । अस्य प्रणवेन सहैकार्थत्वादेकफलत्वमवश्यम्भावि । तदेकार्थत्वं च सत्यतपसः आख्यानारम्भे तारस्थाने तस्यैव सर्वब्राह्मणैरभिपिक्तत्वादवधार्यते । प्रणवश्चोपनिषदा मोक्षैकफल आत्मतत्त्वैकविषयश्चोपदिष्टः — 'ओमित्येवं ध्यायथ आत्मानमन्या वाचो विमुञ्चथ, अमृतस्यैष सेतुरि'ति । यद्वा ई शृणोति स यद्यलकं शृणोति , तर्हि सुकृतस्य सर्वस्य पुण्यस्य । पन्थानं ब्रह्मेन्द्ररुद्रादिपदमपि । नहि प्रवेद प्रकृष्टं बहु वेद न बहुमनुते । स्वयं ब्रह्मानन्दमिहैवानुभवतीत्यर्थः । अथवा स सुकृतस्य पन्थानमपि नहि प्रवेद, किं पुनर्दुष्कृतस्य पन्थानम् । उभाभ्यां सफलाभ्यां विहीनो मुक्तो भवतीत्यर्थः ।

"अपुण्यपुण्योपरमे यं पुनर्भवनिर्भयाः ।
शान्ताः संन्यासिनो यान्ति तस्मै मोक्षात्मने नमः ॥"

इति । अथवा यदीमित्येतदलकं शृणोति, तर्हि सुकृतस्य शोभनानि कृतानि यज्ञदानतपांसि यस्य तस्य । सफलीभूतसर्वसत्कर्मणः न.य

DR. RUPNATHJI(DR. RUPAK NATH)

औरिति शब्दोऽपि नो जाड्याम्बुविच्छित्तये मोहप्रवाहसंहाराय अस्तु। लिङर्थे लोट्। नियोगे च लिङ्। अवश्यं भवत्येवेति मनसा निश्चयेन। सकारयुक्तस्तु किं पुनरित्यप्यर्थः। एवं या मात्रेति चतुर्भिः श्लोकैः शुद्धा च पृथगुपदिष्टा ऐं ईं औः इति। नाहं कवित्वमात्रफलं तृतीयं बीजमुपगच्छामि, तस्या एतन्नान्तरीयफलत्वात्। किन्तु अशेषानर्थबीजभूताविद्यानिवृत्तिफलमुपगच्छामीत्यभिप्रायः॥ ५॥

कथं पुनरेतानि बीजानि जप्तव्यानि, किंकामैः केर्वा जप्तव्यानीत्यत्राह —

**एकैकं तव देवि! बीजमनघं सव्यञ्जनाऽव्यञ्जनं**
**कूटस्थं यदि वा पृथक् क्रमगतं यद्वा स्थितं व्युत्क्रमात्।**
**यं यं काममवेक्ष्य येन विधिना केनापि वा चिन्तितं**
**जप्तं वा सफलीकरोति तरसा तं तं समस्तं नृणाम्॥६।**

एकैकमिति। हे देवि! तव संबन्धि बीजम् एकैकं सव्यञ्जनाव्यञ्जनं सव्यञ्जनमव्यञ्जनं च वा। सव्यञ्जनत्वेऽपि कूटस्थं द्व्यादिक्रमेण षड्व्यञ्जनयुक्तं वा। तत्रापि पृथक् पृथग्वा। अपृथक्त्वेऽपि क्रमगतं वा। यद्वा व्युत्क्रमात् स्थितम्। यं यं कामं धर्मादिकम् अवेक्ष्य येन केनापि वा विधिना विधानेन अङ्गुष्ठ्यादिन्यासक्रमेण वा श्रीगुरुपादुकामात्रस्मरणक्रमेण वा किमप्यकृत्वैव वा। स्वेन रूपेण जप्तं, स्ववाच्यदेवतारूपेण चिन्तितं, निष्कलतया सकलनिष्कलतया सकलतया ध्यातं वा। नृणां सर्वेषां मनुष्याणां स्त्रीशूद्रादीनामपि, न ब्राह्मणपरिव्राजकादीनामेव। तं तं कामं कामितमर्थम्। समस्तमशेषम्। तरसा अस्मिन्नेव जन्मनि, सफलीकरोति जप्तं चिन्तितं वेति मन्त्रदेवतैक्याभिप्रायेणोक्तम्। यथागमः —

"देवतागुरुमन्त्राणां भावयन्नैक्यमात्मना"

इति। सर्वाधिकारित्वे हेतुरनघमिति। स्वतः शुद्धत्वाद् भागीरथीतोयवत् सर्वसेव्यत्वमुचितमिति भावः। इह शुद्धाभेदाश्चत्वारः पुरोक्ताः। कलमुन्दर्यादयः पद् चाविष्कृताः। तेषु च शुद्धबिन्द्वन्तादिभे-

१. 'जप्तम्' ख. पाठः।

देन चातुर्विध्यमिति चतुर्विंशतिभेदाः । तत्रापि ह्यादिकूटचतुष्के सादिहादिभेदेन द्वैविध्यमिति तेषामष्टधा भेदाः । तेषु च प्रत्येकं चतुर्धा भेद इति चत्वारिंशत् । शुद्धाभेदाश्च चत्वारः । तेन चतुश्चत्वारिंशन्मन्त्राः । तेषु त्रयाणां बीजानां पृथक् पृथग् जपे न क्रमाक्रमचिन्ता । बालादिबीजानां शुद्धादिभेदेन प्रत्येकं चातुर्विध्यम् । ह्यादिकूटेषु प्रत्येकं हादित्वं सादित्वं च तत्रापि ग्राह्यम् । यदा समुदायजपस्तदा सृष्टौ क्रमाज्जपः । संहारे स्थितौ चाक्रमतः । तत्रान्त्याद्याद्यबीजान्तत्वे संहारो द्वितीयबीजान्तत्वे स्थितिः । तदेतदभिप्रेत्याहुः पुराविदः—

“आदिमादिमनादिं च मध्यं मध्यममध्यमम् ।
अन्त्यमन्त्यमनन्त्यं च त्रिपुरा शीघ्रसिद्धिदा ॥”

इति ।

आदिनाथ ऋषिस्त्वेषां लैपेयं छन्द उच्यते ।
देवता त्रिपुरा देवी द्विरुक्तैः स्वैः षडङ्गकम् ॥
धर्मवाक्सिद्धिकामानां जपे सृष्टिक्रमो भवेत् ।
अर्थकामार्थिनां गीतो जपे सद्भिः स्थितिक्रमः ॥
मुमुक्षूणां तु सर्वेषां संहारक्रम ईरितः ।
मन्त्राक्षरन्यासविधावपि न्यायमिमं विदुः ॥

ऐं अण्डजे अङ्गजानन्ददेवि[1] ! नु हि क रि[2] आज्ञां पूजेयामि । ऐं[3] परायै श्रीगुरुपादुकाद्वयं नमः । क्लीं अपरायै, सौः परापरायै, ऐं अनन्तानन्दनाथदेव! अनन्तानन्दनाथदेवि[4]! श्रीगुरुपादु० नमः । क्लीं अवतारनाथदेव! अवतारनाथदेवि ! श्रीगुरुपादु० नमः । सौः श्रीसिद्धनाथदेव! श्रीसिद्धनाथदेवि! श्री (गुरु)पादु० नमः । पुनः परमगुरुपादुकानाथदेवीपर्युक्ता । पुनः स्वगुरुपादुकेति नव श्रीगुरुपादुका इह ज्ञेयाः । ऐं रक्तचरणाभ्यां नमः । सौः शुक्लचरणाभ्यां नमः । क्लीं रक्तशुक्लचरणाभ्यां नमः । ऐं क्लीं सौः रक्तशुक्लमिश्रचरणाभ्यां नमः । इति रहस्यचरण-

---

१. ‘श्रत्वा’ ख. ग. पाठः. २. ‘र’ ग. पाठः. ३. ‘ऐं श्रीप’, ४. ‘नन्तना’, ख. पाठः.

DR.RUPNATHJI(DR.RUPAK NATH)

मुखरीकृतेन वाचालतां नीतेन प्रवर्तितवाक्प्रसरेण मयाल्पश्रुतेनापि हठाद् वेगेनाबुद्धिपूर्वमेव ध्रुवं निर्बाधमिदं रचितम् । निर्बाधमिति सालङ्कारत्वसरसत्वाभावदोषोऽपि विचारदशायां नास्मिन् स्तोत्रे समस्ति । कुतः । 'स एष रसानां रसतम' इति मुख्यरसत्वेन श्रुतौ श्रुतस्य शिवशक्त्यात्मकस्य तत्त्वस्याखण्डानन्दसंविद्रूपस्य तद्भक्तिरसस्य च सर्वत्रात्र प्राधान्येन व्यञ्जितत्वाद् अन्येषामपि रसानां यथायोगमेतदङ्गतयालङ्कारत्वेन व्यञ्जितत्वाच्च । 'दृष्ट्वा सम्भ्रमे'त्यद्भुतस्य, 'यन्नित्ये ! तवे'ति करुणस्य, 'विरलो बालकोऽपि बुध' इत्युक्तेः, 'यत्सद्यो वचसामि'ति चाद्भुतस्य, औकारस्य गकारसाहित्ये सरस्वतीवाचकत्वं तद्राहित्ये तन्मन्त्रत्वमित्युक्तेः, 'एकैकं तवे'त्यद्भुतस्य, 'वामे पुस्तके'ति शान्तस्य, 'ये त्वां पाण्डरे'त्यद्भुतस्य, 'ये सिन्दूरे'ति विप्रलम्भशृङ्गारस्य, 'चञ्चत्काञ्चने'ति शृङ्गाराद्भुतयोः पूर्वापरार्धाभ्याम्, 'आर्भट्ये'ति सम्भोगशृङ्गारशान्तयोः, 'जातोऽपी'त्यद्भुतवीरयोः, 'चण्डि ! त्वच्चरणाम्बुजे'ति भयानकस्य, 'विप्राः क्षोणिभुज' इति करुणस्य, सर्ववर्णाश्रमिणां स्त्रीपुरुषाभेदेन येन केनापि यथालब्धेन द्रव्येणाभ्यर्चिता भगवती तं तं काममनुगृह्णातीति परमकारुण्यप्रतीतेः, 'शब्दानां जननी'त्यद्भुतभयानकयोः पूर्वापरार्धाभ्यां, 'देवानां त्रितयमि'त्यप्यद्भुतस्य, त्रिपुरानाम्नः सर्वार्थकबलनशक्तिप्रकारस्याविष्कृतत्वात्, 'लक्ष्मीं राजकुले' इति भयानकस्य, 'माया कुण्डलिनी'त्यन्तयोराद्ये च भाव एव, न पुना रसान्तरमत्रास्ति । भक्तिरसेनोपक्रम्य तेनैवोपसंहारे तत्रैवास्य तात्पर्यमिति च प्रत्यायितं भवति । प्रथमश्लोकादिषु यमकालङ्कारोऽपि क्वचित् क्वचिद् भवति, अनुप्राससौकुमार्यादयः शब्दालङ्काराश्च भवन्ति । गूढयोजनत्वगूढवर्णत्वादिना चित्रकाव्यता च विस्पष्टा विपश्चितामिति । तदेवं निर्दोषत्वात् सगुणत्वात् सरसत्वाच्च सर्वैः पठनीयमेतदिति सिद्धम् । यद्वा अनादिगुरुपरम्पराप्राप्तत्वेन नित्यत्वादपौरुषेया इतीहोपदिष्टा मन्त्राः स्वतः प्रमाणत्वेन ग्राह्याः । इदं स्तोत्रं त्विदानीं त्वयोक्तमिति पौरुषेयत्वाद्य

१. 'कः' क. पाठः.

DR. RUPNATHJI( DR. RUPAK NATH )

